## विंशतिकात् खः । (३२/१६९७)

[1]अध्यर्धपूर्वात् प्रातिपदिकाद् द्विगोश्च विंशतिकशब्दान्तात् आर्हीयेष्वर्थेषु खः प्रत्ययो भवति । अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् । त्रिविंशतिकीनम् । विधानसामर्थ्यात् [2]अस्य लुक् न भवति ॥

## खार्या ईकन् । (३३/१६९८)

अध्यर्धपूर्वाद् द्विगोः इत्येव । अध्यर्धपूर्वात् [3]प्रातिपदिकाद् द्विगोश्च खारीशब्दान्तात् आर्हीयेष्वर्थेषु ईकन् प्रत्ययो भवति । अध्यर्धखारीकम् । द्विखारीकम्[4] ।

[५०७] [5]केवलायाश्चेति वक्तव्यम् । (म. भा. २. ३४९)
खारीकम् ।

[५०८] काकिण्याश्चोपसङ्ख्यानम् । (म. भा. २. ३५०)
अध्यर्धकाकिणीकम् । [6]द्विकाकिणीकम् । त्रिकाकिणीकम् ।

[५०९] केवलायाश्च । (म. भा. २. ३५०)
[7]काकिणीकम् ॥

## पणपादमाषशताद्यत् । (३४/१६९९)

[8]अध्यर्धपूर्वाद् द्विगोः इत्येव । अध्यर्धपूर्वाद् [9]द्विगोश्च पणपादमाषशत[10]शब्दान्तात् आर्हीयेष्वर्थेषु यत् प्रत्ययो भवति । अध्यर्धपण्यम् । द्विपण्यम् । त्रिपण्यम् । पाद–अध्यर्धपाद्यम् । द्विपाद्यम् । त्रिपाद्यम् । [11]पद्भावो न भवति '[12]पद्यत्यतदर्थे' (६. ३. ५३/९९१) इति । [13]प्राण्यङ्गस्य (६. ३. ५२/९९०) स इष्यते । इदं तु परिमाणम् । [14]माष–अध्यर्धमाष्यम् । द्विमाष्यम् । त्रिमाष्यम् । शत – अध्यर्धशत्यम् । द्विशत्यम् । त्रिशत्यम् ॥

## शाणाद्वा । (३५/१७००)

अध्यर्धपूर्वात् द्विगोः इत्येव । [15]शाणशब्दाद् अध्यर्धपूर्वाद् द्विगोरार्हीयेष्वर्थेषु वा यत् प्रत्ययो भवति । ठञोऽपवादः । पक्षे सोऽपि भवति, तस्य [16]च लुक् । [17]अध्यर्धशाण्यम्, अध्यर्धशाणम् । द्विशाण्यम्, द्विशाणम् । त्रिशाण्यम्, त्रिशाणम् ।

[५१०] शताच्चेति वक्तव्यम् ।
अध्यर्धशत्यम्, अध्यर्धशतम् । द्विशत्यम्, द्विशतम् । त्रिशत्यम्, त्रिशतम् ॥

---

1. अध्यर्धपूर्वात् द्विगोश्च द्वित्रिपूर्वस्य ब. फ, अध्यर्धपूर्वद्विगोः इत्येव ह. ड. 2. अस्य नास्ति अ.व.ड.ह. 3. प्रातिपदिकात् नास्ति फ. 4. त्रिखारीकम् इत्यधिकम् ब. ग. फ. 5. केवलाच्चेति अ. ब.क.ड. 6. नास्ति फ, द्विकाकणीकम् ग. 7. काकणीकम् ग. 8. वाक्यमिदं नास्ति फ. 9. प्रातिपदिकात् इत्यधिकम् क. फ. 10. शब्द नास्ति क. 11. अत्र इत्यधिकम् फ, पादशब्दस्य पद्भावः क. 12. पद्यत्येव इत्यनेन ड. 13. प्राण्यङ्गात् शब्दस्य पद्भावः इष्यते क. 14. माष–त्रिशत्यम् नास्ति क. 15. शाणशब्दान्तात् ह. क. फ. 16. च नास्ति फ. ब. ह. 17. अध्यर्धशाण्यः फ. ह.